# श्रीरामचन्द्राष्टकम्

चिदाकारो धाता परमसुखदः पावनतनु-
र्मुनीन्द्रैर्योगीन्द्रैर्यतिपतिसुरेन्द्रैर्हनुमता ।
सदा सेव्यः पूर्णो जनकतनयाङ्गः सुरगुरू
रमानाथो रामो रमतु मम चित्ते तु सततम् ॥१॥
मुकुन्दो गोविन्दो जनकतनयालालितपदः
पदं प्राप्ता यस्याधमकुलभवा चापि शबरी ।
गिरातीतोऽगम्यो विमलधिषणैर्वेदवचसा । रमा० ॥२॥
धराधीशोऽधीशः सुरनरवराणां रघुपतिः
किरीटी केयूरी कनककपिशः शोभितवपुः ।
समासीनः पीठे रविशतनिभे शान्तमनसो । रमा०॥३॥
वरेण्यः शारण्यः कपिपतिसखश्चान्तविधुरो
ललाटे काश्मीरो रुचिरगतिभङ्गः शशिमुखः
नराकारो रामो यतिपतिनुतः संसृतिहरो । रमा० ॥४॥
विरूपाक्षः काश्यामुपदिशति यन्नाम शिवदं
सहस्त्रं यन्नाम्नां पठति गिरिजा प्रत्युषसि वै ।
स्वलोके गायन्तीश्वरविधिमुखा यस्य चरितं । रमा० ॥५॥
परो धीरोऽधीरोऽसुरकुलभवश्चासुरहरः
परात्मा सर्वज्ञो नरसुरगणैर्गीतसुयशाः ।
अहल्याशापघ्नः शरकरऋजुः कौशिकसखो । रमा० ॥६॥
हृषीकेशः शौरिर्धरणिधरशायी मधुरिपु-
रूपेन्द्रो वैकुण्ठो गजरिपुहरस्तुष्टमनसा ।
बलिध्वंसी वीरो दशरथसुतो नीतिनिपुणो । रमा० ॥७॥
कविः सौमित्रीड्यः कपटमृगघाती वनचरो
रणश्लाघी दान्तो धरणिभरहर्ता सुरनुतः ।
अमानी मानज्ञो निखिलजनपूज्यो हृदिशयो । रमा० ॥८॥
इदं रामस्तोत्रं वरममरदासेन रचित
मुषःकाले भक्त्या यदि पठति यो भावसहितम् ।
मनुष्यः स क्षिप्रं जनिमृतिभयं तापजनकं
परित्यज्य श्रेष्ठं रघुपतिपदं याति शिवदम् ॥९॥

**इति श्रीमद्रामदासपूज्यपादशिष्यश्रीमद्धंसदासशिष्येणामरदासाख्यकविना विरचितं श्रीरामचन्द्राष्टकं समाप्तम्।**

## श्रीरामचन्द्राष्टकम् स्तोत्र पाठ से लाभ

जो व्यक्ति भक्ति और श्रद्धा के साथ प्रातःकाल इस सुन्दर स्तोत्र का पाठ करेगा वह शीघ्र सभी सुखों का आनन्दप्राप्त करेगा और भव बन्धन से छूट कर रघुनाथ जी के साकेत धाम में स्थान प्राप्त करेगा।